MSS No. 259 Subject Language

Name of MSS तत्वबोधिनी सिद्धान्त कौमुदी

Author

Period Folios 468

Script Sanskrit Source Prithipal Singh

Missing Folios

259

S/

तत्त्व बोधिनी सिद्धान्त कौमुदी व्याख्या सुबन्त ॥
६६ पत्रक ॥ ल० अ० १० पं० प्र० पृ०

ह० ल०

तत्ववोधनी

259

تتّ بودہنی در علم فلسفہ

366

13X6

1812

त॰बो॰
१

ॐ श्रीगणेशाय नमः सरस्वत्यै नमः नत्वा विश्वेश्वरं शंभुं कृत्वा च गुरुवंदनं सिद्धांतकौमुदीव्याख्या क्रियते त
त्त्वबोधिनी ॥१॥ विघ्नविघाताय कृतं मंगलं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते मुनित्रयमि
त्यादिना त्रयोऽवयवा यस्य तत्त्रयम् संख्याया अवयवे तयप् द्वित्रिभ्यां तयस्यायच् मंतारो वेदशा
स्त्रार्थतत्त्वावगन्तारो मुनयः मनेरुच्चेत्यौणादिकसूत्रेण मनेरउकारो मनेः परइन्प्रत्ययश्च गुणस्तु नेह भ
वति किदित्यनुवर्त्तनात् नपरकरणाद्वा तेषां पाणिनिकात्यायनपतंजलीनां त्रयं ननु स्वयंभुवे नम
स्कृत्येत्यत्रेवात्रापि नमःस्वस्तीत्यादिना चतुर्थी स्यात् मैवम् उपपदविभक्तेःकारकविभक्तिर्बलीयसीति
वक्ष्यमाणत्वात् नमस्करोति देवानितिवद्द्वितीयाया एव युक्तत्वात् किञ्च जहत्स्वार्था वृत्तिरिति पक्षे
नमः शब्दस्यात्र निरर्थकत्वात्तद्योगे चतुर्थी न भवति अर्थवद्ग्रहणपरिभाषायाः प्रवृत्तेः स्वयंभु
वे नमस्कृत्येत्यत्र तु स्वयंभुवमनुकूलयितुमित्यर्थविवक्षायां क्रियार्थोपपदस्येत्यादिना चतुर्थी
ति मूल एव स्फुटीभविष्यति नचैवं नमःस्वस्तीति सूत्रे नमःपदं व्यर्थमित्याशंक्यम् हरये नम इत्यत्र १

इतिमतुक्कालपितृमित्यर्थेविवक्षितेसंबंधसामान्येषष्ठ्याप्राप्तायांतदपवादनयातस्यावश्यकत्वात् तदुक्तीरि
ति तेषांपाणिन्यादीनामुक्तीः सूत्रवार्त्तिकभाष्याणीत्यर्थः तस्यमुनित्रयस्योक्तीरितिपर्यवस्यति परि
भाव्येति पर्यालोच्येत्यर्थः नचपरिपूर्वकस्यभवतेस्तिरस्कारार्थकत्वात्कथमत्रज्ञानार्थतेतिशंक्यम्
परीत्यस्यभावीतिवृत्तादिग्रन्थेनयोगात् केचित्त्वत्रभवतिनायोगमभ्युपेत्याहुः परोभुवोऽवज्ञानेइतिसूत्रेपरोभुवइ
त्यस्यावज्ञानइतिविशेषणान्नतिरस्कारार्थत्वनियमः मनसापरिभाव्यकंचिदित्यादिइत्यादिप्रयोगाच्च अत
एवात्राप्रयुक्तत्वदोषशंकापिनास्तीति अमन्यत्वनादरःपरिभवःपरिभावस्तिरस्क्रियेतिकोशात् परिपूर्वका
द्भवतेर्ज्ञानेनादेवतिरप्रतीतिर्नोन्यस्यादिमापशंकेवात्रन्यस्तीतित्याहुः तन्मरम्य परिभूयपरिभूयपरिभववती
त्यतोपिनिरस्कारार्थप्रतीतेः वैयाकरणेति व्याकरणंअधीयतेविदंतिवावैयाकरणाःतत्सिद्धान्तानांकौ
मुदीप्रकाशिकाइत्यर्थः निर्दुष्टसकलजनाह्लादकत्वसाम्येनकौमुदीशब्दप्रयोगःक्रियमाणायाम्
पिकौमुद्यावृद्धासन्निध्यापितत्वादियमित्यंगुल्यानिर्देशः विरच्यतेइति मयेतिशेषः स्त्रीप्रत्यये प्रथ

त॰बो॰
२

त्वोरुगणाधानेविश्ववदस्माद्वर्त्तमानसामीप्येभविष्यदर्थेवर्त्तमानप्रत्ययः अइउण् णानुबंधोअणसंज्ञार्थः
ऋऌक् इति ककारस्तु गित्कुङक्संज्ञार्थः एओङ् ङकारएङ्संज्ञार्थः ऐऔच् इति चकारस्तु चिचेचैचसंज्ञार्थः व
र्णानामसिद्धचत्वेनबोधनायसंहितायामविवक्षमाणत्वेनैषसंधिः स्वराणांचादिषुपाठात्स्वादयोसत्वइति
निपातसंज्ञायांनिपातएकाजनाङ्गितिप्रगृह्यत्वेप्रकृतिभावान्नसंधिरित्यन्ये स्यादेतत् अकाराद्युपदेशेन
यथातस्यवर्णानामाकारादीनांलाभात्पृथगाकारादयोनोपदिष्टास्तथाऋऌवर्णयोरपिसावर्ण्यादृ
कारोपदेशेनैवोभयसिद्धेःकिमर्थमुपदेशेन नचज्ञातिपदेऋऌवर्णयोःपृथगुपदेशआवश्यकस्तयोर्भि
न्नजातित्वादितिवाच्यम् सावर्ण्यादेवैकजात्युपदेशेजात्यन्तरस्यापिलाभात् ऋऌवर्णयोःप्रत्येकंत्रिंशतःसं
ज्ञासिद्धयेअणुदित्सवर्णस्येतिसूत्रेअणग्रहणस्यजातिपदेप्यावश्यकत्वादितिचेत् अत्राहुः ऋऌवर्ण
योःसावर्ण्यस्यानित्यतांज्ञापयितुमुभयोरुपदेशस्तत्फलंतुक्लृप्तशिखायस्यसक्लृप्तशिखस्तस्यहृदान्सेवो
यनेक्लृप्तशिखिवेतिसिद्धः ऋऌवर्णयोःसावर्ण्यस्यानित्यत्वेतु अन्ततइतिपर्युदासाद्धकारस्येवऌकारस्या २

पिप्लुतो न स्यादिति समाधानान्तरमप्यग्रे तत्र दर्शयिष्यते । हयवरट् टानुबन्धोऽट्संज्ञार्थः ॥ हकारोपदे
शस्त्वट्ष्वश्हश्यण्ग्रहणेषु हकारग्रहणार्थः अर्हेण अट् व्यवायेपीति णत्वम् देवा हसन्तीत्यत्र भो
भगोऽइति रोर्यत्वम् देवा हसन्ति हशि चेत्युत्वं लिलिहिढ्वे लिलिहिध्वे विभाषेट इति ढः लण् णकारानु
बन्धोऽणिण्यण्संज्ञार्थः नन्वणितीच्चित्पूर्वेण णकारेण ग्रहणं स्यात्तेष्विच्चित्परेण णकारेणाद्गुणितिषु परेण
णकारेणैव तथा च निःसन्देहार्थमन्त्यवर्णान्तरमेव कर्त्तव्यमिति चेत् सत्यम् व्याख्यानतो विशेषप्रतिपत्तिर्न
हि संदेहादलक्षणमिति परिभाषाज्ञापनाय पुनर्णकारोऽनुबन्धत्वेन स्थितमाकरे ञमङणनम् मकार
स्त्वम्यम्ङम्संज्ञार्थः झभञ् ञकारो यञ्संज्ञार्थः घढधषिति षकारस्तु झष्भष्संज्ञार्थः जबगड
दशा इति शकारानुबन्धोऽश्हश्जश्झश्बश्वश्संज्ञार्थः [illegible]संज्ञार्थः [illegible]
[illegible]संज्ञार्थः [illegible]संज्ञार्थः खफछठथचटतव् इति सूत्रे वकारस्तु छ
व्संज्ञार्थः कपयिति यकारो यय्मय्चय्संज्ञार्थः शषसरिति रेफस्तु यर्झर्खर्चर्शर्संज्ञार्थः हलिति

त॰बो॰
३

लकारस्त्वल्वल्रल्झल्संज्ञार्थः पुनर्हकारोपदेशस्तु वल्रल्झल्शल्सु हकारग्रहणार्थः हदिहि
ग्धपिहि रुदादिभ्यः सर्वधातुके इति वलादिलक्षण इट् स्निहित्वा न क्त्वा सेडिति निषेधं बाधित्वा रलो व्यु
पधादिति कित्वम् अदाग्धाम् घत्वस्यासिद्धत्वेपि हकारस्यापि झलत्वात् झलो झलीति सलोपः अलि
क्षत् शल इति क्सः पुनर्हकारोपदेशस्यापृथक्त्वेपि शरमध्येव हकारं पठित्वा अलोन्त्यस्य हलोन
न्तराः संयोगः झलो झलि शल इगुपधेत्यादिसूत्राणि यथावृत्तिलानुवंधानितानिष्ठेत्यस्य हरोनुरा
सेवं रूपेणा रेफानुवंधास्येव चक्रत्वाद्धलिति पृथक्सूत्रे त्यजन्ते मैवम् तथाहि सति हरिईसति हरिहेरि
त्यादि न सिध्येत् तत्र स्वरवसानयोर्विसर्जनीयो वा शरीत्यादिप्रसंगात् अतो हलिति सूत्रमावश्यकमेव
एवं च हलिति सूत्रेन्त्यमिति वक्ष्यमाणे घोपि स्वरस्वन्तः स्याच्छते अणादिसंज्ञार्थानि अणादिसंज्ञा
प्रयोजनं येषां तानीति विग्रहः अणादिसंज्ञाभ्यः इमानीत्यस्वपदविग्रहो वा अर्थेन नित्यसमासो
विशेष्यलिंगता चेति वक्ष्यमाणत्वात् एषामंत्या इत इति एषां सूत्राणामन्त्यादयो हलन्त्यमिति सूत्रेण ३

इत्संज्ञकाइत्यर्थः अकारश्चेति अनन्त्यत्वात्पृथगुक्तिः वचनविपरिणामेनइदितिसंबध्यते इत्संज्ञाचा
स्यउपदेशेऽजनुनासिकइत्यादिनेति एवंचणादिभिरिद्भिरादिरन्त्येनेतिवक्ष्यमाणेन प्रत्याहारग्रह
णादिसंज्ञाघ्रानीतियदुक्तंतत्संगच्छतेइतिभावः अकारउच्चारणार्थःइति नतुलणसूत्रस्याकार
इवप्रयोजनार्थःइत्यर्थः हलन्त्यम् अन्त्यमवसानेभवंअन्त्यं दिगादित्वाद्यत् उपदेशेऽजनुनासिकइदि
तिचात्रानुवर्तते आदिरन्त्येनेतिसूत्रेणअन्योन्याश्रयमाशंक्यआवृत्त्यातेपरिहरति हलितिसूत्रेऽन्त्यमिति ह
लिअन्त्यमितिविग्रहेसप्तमीतियोगविभागात्सुप्सुपेतिवासमासइतिभावः यद्वाषष्ठीतत्पुरुषोयंहलि
निर्दिष्टस्यान्तमित्यादिनिर्माणासंभवात् आदिरन्त्येनसहेता अन्त्येनेतिकिम् सुटइतिप्रत्याहारःस्या ५८
तौऐकवचनावयवेनमाभूदितिकाशिकाकृत् यद्यपिटकारान्तसंज्ञसटाटकारोऽप्यन्त्योभवतितथा
पिअन्त्येनेतिग्रहणसामर्थ्यादन्त्यत्वप्रयुक्तायस्यैवसंज्ञातेनैवप्रत्याहारः नहिटाटकारादेर्हलन्त्यमिति
इत्संज्ञाप्रवर्तते नचैवंरप्रत्याहारासिद्धिः लणसूत्रस्थावर्णस्यानुनासिकत्वप्रतिज्ञासामर्थ्यादनेन

त॰बो॰
४

नापिइत्याप्रत्याहाराणामसिद्धत्वतीतिकाशिका निष्कर्षस्तिहसौजसमौड्इतिसूत्रेदर्शयिष्यते विस्तरस्तुशब्द
कौस्तुभेनुसंधेयः इत्येतिम् रप्रत्याहारोयथास्यात् सतिहि अनुनासिकत्वप्रतिज्ञासामर्थ्यादनन्यस्यनापि
गदृष्ट्यानइत्स्त्वकम् नचैवमदितेत्यस्यविरहेणलभ्यतेइतिकौस्तुभेस्थितम् आद्यन्ताभ्यामवयवाभ्यामव
यवीसमुदायआक्षिप्यते तस्यचयुगपत्सम्प्रयोगाभावादवयवेषुवर्तमानरन्तौसंज्ञामध्यगेषुविश्राम्यति
ततआद्यन्तयोःसंज्ञास्वरूपान्तर्भावेनतयोःपरार्थनिर्णयादितिभावः मध्यगानामिति स्वस्यचेति स्व
रूपमित्यनुवर्त्ततेस्वरूपेचादेरेवाश्रयतेतोत्यस्य संज्ञेत्यनेनप्रधानतृतीयानिर्देशात् सर्वनाम्नउत्सर्गतः
प्रधानपरामर्शित्वात् ननुसामित्यस्यानुवृत्तौकःसंज्ञीस्यात्कोवात्रायःशब्दनताद्रूप्यादेयोनस्यात् न
चायोत्प्रयोगचैत्यादाविकारःस्यादकारेपरेअनयोवमसंश्रयः तैवम् आदिरेवसंज्ञीत्येव आदिरन्त्येनेति
संज्ञाकरणस्यवैयर्थ्यापत्तेः किञ्च अणग्रहणमपवादीनांहयवट्ड्देशीयव्यर्थः स्यात्सर्वत्राकारसेदसंज्ञि
नेत्यादिरन्त्येनेतिसंज्ञाकरणस्यवैयर्थ्यापत्तेः किञ्च अणग्रहणमपवादीनांहयवट्ड्देशीयव्यर्थः ४

स्यात्सर्वत्राकारस्यैवसंज्ञितत्वादितिदिक् शब्दकौस्तुभेतुआद्यंतावयवद्वारासमुदायानुकरणेनसिद्धेसूत्रस्य
बाहुल्यार्थमिदंसूत्रमितिस्थितम् उपदेशेऽजनुनासिकइत् उपदेशेकिम् अग्निचित् सोमसुदितिकाशिका
अत्रेत्संज्ञायांलोपःस्यात् नचतुकोवैयर्थ्यंआगमत्वमादौचरितार्थत्वात् नचक्विपःपित्त्वस्यैववैयर्थ्यम्
अग्निचिताचित्यादौचरितार्थत्वादितिहरदत्तः अजितिकिम् मनिनोमकारस्यमाभूत् सत्यांहीत्संज्ञाया
मेत्वादश्चःपरःस्यात् वेश्म सद्म सर्वथानुभयोमनिन् हलितिकिम् भूसंज्ञायामभविता नचप्रयोजनाभा
वान्नेत्वमितिवाच्यम् सत्यामित्संज्ञायामुदितइतीड्विकल्पापत्तेः अन्येतुचिरिणोतिरिणोतिइहयातोर
नस्यमाभूत् सत्यामित्संज्ञायामिदितइतिनुम्स्यादित्याहुः आद्योच्चारणमिति आद्योच्चारणविषयीभू
तोयःशब्दस्तस्यात्यहलित्यादितिफलितोर्थः उपदेशेज उपदेशानेउपदेशाभावपन्न उपदेशेकिम् अत्र
आंत्रयःसतन्नस्यर्थयोनेकोत्राङ् आङोनुनासिकश्छंदसीत्याकारोनुनासिकयद्यपिअत्रउक्तःऊँइत्यत्रेवा
नुनासिकविधानसामर्थ्यान्नेत्वमितिसूवचनयाप्युनरार्थमवश्यंपकत्तेमाम्नुपदेशग्रहणास्यष्टप्रतिपत्त

तत्व
बो. धि.
५

येऽइहैवकृतम् अग्निति किम् मनिनोमकारस्समाभूत् नचहलेमसिंश्मग्रहणसामर्थ्यादनेनास्यमकार
स्यानभवेदितिवाच्यम् आलुचआलुप्रत्ययादौअग्निप्रसंगवारणेन तस्यचरितार्थत्वात् अनुनासिकइति
किम् ईदावर्णेने ईदितः सप्ताहीम्मज्ञायामीदितोनिष्ठायामितीनिरस्यात् यद्यप्यत्रापञ्चमीव्यक्तावदनुनासि
कसंज्ञाप्रथममेववक्तुमुचितातथापिनासिकमनुगतत्वे नियोगाश्रयणेनैवगतार्थत्वादनुनासिकसंज्ञास
त्रेमेदप्रयोजनमितिध्वनयितुंनेहोपन्यस्तम् नचैवंपरोऽनुनासिकइत्यत्रयरः परोऽनस्यानुनासिकशब्देप
वेनुनासिकःस्यादित्यर्थः प्रसज्येत स्वरूपमितिपरिभाषोपस्थानात् संज्ञाकरणेनअणशब्दसंज्ञेतिनिष
यान्नायंदोषइतिवाच्यम् उक्तपरिभाषायाभाष्यप्रत्याख्यानात् उपान्मन्त्रकरणेइत्युक्तेभाष्येचीवरासि
ङनुणोनमित्यादिनिर्देशेनस्वरूपमितिपरिभाषायाअनुपस्थितिकल्पनात्स्त्रचमतेपिदोषाभावात्
ननुउक्तनिर्देशाश्रयेणप्रतिपत्तिगौरवमितिचेत् अतएवनिष्प्रयोजनमित्युक्त्वाभेदप्रयोजनमित्युक्ते
प्रतिज्ञायतेइतिप्रतिज्ञा आनत्वोपसर्गेइतिकर्मण्यङ् अनुनासिकस्यभावआनुनासिक्यंगुणवचनब्रा ५

स्वरणादिभ्य इति षष्ठ्यत्र प्रतिज्ञा अनुनासिकं येषामिति विग्रहः केचित्तु। प्रतिज्ञाने प्रमितत्वात्साध्यस्यासीति प्र
तिज्ञम् असाध्यञ्च प्रतिज्ञमानुनासिक्यं येषामिति विग्रहेति यद्यपि सूत्रकारस्तु लोऽनुनासिकपाठ
इदानीं परिभ्रष्टस्तथापि वृत्तिकारव्यवहारबलेन यथाकार्यं प्राक् स्थित इत्यनुमीयत इति भावः पाणिनी
या इति पाणिनिना प्रोक्तं पाणिनीयं वृद्धाच्छः तदधीयते विदन्ति वा पाणिनीयाः तदधीनेष्य णः प्रो
क्तालुक् नन्वरलयोरिति चेन्नेटकारस्यापि मध्यगत्वात्तदाह प्रत्याहारेष्विति अनुनासिक इत्यादीति आ
दिशब्देन पाणिनेः केकन्सते इङः इत्यादिग्राह्यम् प्रत्याहारशब्देनेति प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा यस्मिन्निति
प्रत्याहारः करणाधिकरणयोश्चेति ल्युट् प्राप्तेऽपि बहुलग्रहणाद् अधिकरणे घञ् यद्यपि योग
मात्रमकारादिसंज्ञा स्यादिति प्रसक्तं तथापि योगरूढिरिति भावः ऊकालोज्झ्रस्वदीर्घप्लुत इति समाहार
द्वन्द्वः सौत्रं पुंस्त्वम् ऊ इति प्रश्लिष्टा सवर्णदीर्घेण कृते जसि परतो यणि च वः आत्मनो काल ऊकालो यस्येति फ
लितार्थकथनमिदं विग्रहस्तु वः कालो यस्य सः इति वाच्यः उभाभ्यां उच्चारणकालोलक्षणे अत्र किञ्च से

ते॰ त॰
वो॰ भि॰
९

योगस्यामाभूत् प्रत्यह्व परोदात्तकषस्यैकमात्रत्वेन हृस्वसंज्ञायां हृस्वस्यापितिकृतीतितुक् स्यात् आयेइ
ति निपातनाद् आद्युदात्तत्वात्ताकारउदात्तः पञ्चकृत्वस्त्वपिस्यइत्यनेनोदात्तः अर्वाङ् इति अर्वन्नित्येनमचतीत्यर्वा
ङ् ऋत्विग्दधृगित्यादिनाञ्चतेः सुप्युपपदे क्विन् अन्यानामपि दृश्यत इत्यस्मात्स्वामदिपद्यतिइत्यादिनाव निपात
नाच निष्पन्नोर्वन्शब्दोयान्तस्वरेणाद्युदात्तः वनिपः पित्वेनानुदात्तत्वम् अञ्चतेरकारोपि धातुस्व
रेणान्तस्वरेण वा उदात्तः उपपदमतिङ् इति समासे कृते समासस्यान्तस्वरेण तदन्तगतिकारकोपपदा
त्कृदिति कृदुत्तरपदप्रकृतिस्वरेण वा अञ्चतेरकार उदात्तः वनो नलोपे सवर्णदीर्घे च कृते एकादेश उ
दात्तेनोदात्त इत्यनुदात्ते पदमेकवर्जमिति शेषनिघातादाद्योकारोऽत्रानुदात्तः एतत्संभवाभिप्रायेणोक्त
म् वेदभाष्ये अर्वाङ् अभिमुख इति स्थितम् अत्रेत्यमिति अविवादित इत्यर्थः तस्य च उदात्तस्वरित
परत्वे इति उदात्तस्वरितौ परौ यस्मात्तदुदात्तस्वरितपरं तस्य भावस्तत्त्वं तस्मिन् उदात्तो वा स्वरितो वा प
रश्चेत् पूर्वस्य स्वरितस्य यदुत्तरार्द्धमनुदात्तं तस्य श्रवणं स्पष्टमित्यर्थः अन्यत्रेति उदात्तस्वरितपरत्वा ९

भावे केति किमोत् नित्यस्वरितम् वक्ष्यति अनुदात्तं सर्वमपदादावित्यधिकारादनुदात्तम् अय्याइति अ
योः केति नित्यस्वरेणानुदात्तः संहितायां तेकारेश उदात्तेनेत्योकार उदात्तः उदात्तपरत्वे ह्रस्वस्वरितः
सोदाहरणमुक्तादीर्घस्वरितसोदाहरणमाह स्थानीनयेराइति येऽत्र राह्वयमपि फिट्स्वरेणानो
दात्तम् नतोनुदात्तपदमिमापनुदात्तः एकादेशस्त्वपदे स्वरितः स्वरितो वानुदात्ते पदादावित्युक्तेः
उदात्तस्वरितपरत्वे उदाहरणमाह प्रातवक्रमिति यइति फिट्स्वरेणानोदात्तः ततः परस्यकारत्वेऽ
वेश्वाहुतोच उदात्ते नैकादेश उदात्तः अय्यइति स्वरितोंतत्वादकारस्य शेषनिघातत्वे ओकारेणसह प
कादेशे च कृते स्वरितो वानुदात्ते पदादावित्योकारः स्वरितः कथमस्यास्वरितोंतत्वमिति चेत् अत्रा
ऽः अहमात्मा विश्वस्मात्कर्मणापत् नित्यस्वरितम् रुद्राभाववत्संज्ञापूर्वकविधेरनित्यत्वादिति अ
निमील इति ईकारः स्वरितः लेइति तप्रत्ययाः पर्यायपकश्चातिरिति स्वरप्रक्रियायां मूलएव स्फुटी
करिष्यति मात्वनासिकेति मात्वंचनासिका चेति किं ग्रहेमाणंपगत्वाटके वज्रावे सुत्वनासिकमि

त. त्व.
बो. धि.
७

तिस्यादतआह मुखसहितेति नासिकयोच्चार्यमाणेति फलितार्थकथनमिदं उच्यतेऽनेनेति वचनं मुखेना
सिकावचनमस्येति विग्रहः तुल्यास्येति आस्येभवमास्यं शरीरावयवाद्यत् इत्यभिप्रेत्याह ताल्वादिरिति आ
भ्यन्तरेति एतच्च प्रयत्नस्य बलाल्लभ्यते तुल्यास्यं किम् तप्रोश्चत्र पकारस्य तकारे परेझरीति लोपो माभूत्
प्रयत्नग्रहणं किम् वाक्श्च्योतति शसलोपो न ञमङणनानामिति नासिकाचेति चकारेण वर्णानुकूलं
ताल्वादिस्थमनुजीयते पदैतोरित्यादौ तपरत्वमसंदेहार्थम् ततकालग्रहणार्थम् तत्कालग्रहणार्थम्
ततकालग्रहणार्थम् तेन प्लुतस्यापि संग्रहः चकारेदैति निष्कर्षे पदे तु पचथा कुम्भ्यण्णमीषद्विवृतप्रयत्ना
भ्युपगमात् स्पृष्टेषत्स्पृष्टेति एतेषामाभ्यन्तरत्वं वर्णोत्पत्तिप्राग्भावित्वात् तथाहि नाभिप्रदेशात्प्रयत्नप्रेर
तो वायुः प्राणो नाम ऊर्ध्वमाक्रमन्नुरःप्रभृतिस्थानान्याहन्ति ततो वर्णस्य तदभिव्यञ्जकध्वनेर्वोत्पत्तिः
तत्रोत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थाने ताल्वादिसम्यक्स्पृशंति तदा स्पृष्टता
ईषत्परास्पृशंति तदेषत्स्पृष्टता समीपावस्थानमात्रे संवृतता दूरत्वेपि विवृतता अतएवइदुप्रश्ना

८

दीनां तालुस्थानत्वाविशेषोपि तालुस्थानेन सह जिह्वाग्रादीनां च चर्माञ्चारणे कर्त्तव्ये सम्यक् स्पर्शः यकारे ईषत्स्
पृष्टता कारे करयोस्तु ईषद्विवृतिरित्याद्यनुभवैः शिक्षाकारायुक्तिं चानुसृत्य विवेचनीयं विवारसंवारादि
यस्तु वर्णानामन्तः प्रयत्नान्मूर्द्धि प्रतिहतैः निवृत्तैः प्राणाख्यैर्वायुभिः पार्श्वस्थैः त्वच्येन इति वा ह्यादस्य चाप्ते गलबिल
स्य संकोचनात्संवारः तस्यैव विकाशाद्विवारः एतौ च संवृत ह्रस्वाभ्यामाभ्यन्तराभ्यां भिन्नावेव तयोः सम्मी
पद्दस्वस्थानात्मकत्वादित्यवधेयम् अ अ इत्यपामिति विभक्तेपाल्लेकू आद्यो विवृतः द्वितीयस्तु संवृतस्तत्
दाह विवृतमनूद्येति विवृतस्य स्थाने इत्यर्थः विवृतत्वमस्यैवेति तेन दण्डायनमित्यादौ सवर्णदीर्घः सिध्य
तीति भावः पूर्वत्रासिद्धम् यद्यपि स्वतन्त्रो विधिः स्यात्तर्हि त्रिपादी सर्वं प्रत्यसिद्धे स्येवलभ्येत त्रैपादिकं तु सर्वं
प्रति परं नासिद्धं स्यात् तथा च प्रशान् इति तत्र मो नो धातोरिति नत्वस्यासिद्धत्वान्नलोपः स्यात् नत्वविधेः संबु
द्धौ चरितार्थत्वात् तथा नड्वान् इत्यत्र संयोगान्तस्य लोपस्यासिद्धत्वान्नलोपः स्यात् नुमविधेस्तु संबुद्धौ चरि
तार्थत्वात् तथा नड्वान् इत्यत्र संयोगान्तस्य लोपस्यासिद्धत्वान्नलोपः स्यात् नुमविधेस्तु संबुद्धौ चरितार्थत्वा

त॰ब॰
बो॰धि॰
८

वतस्माह अधिकारोयमिति त्रिपाद्यां विहितकार्यमिति कार्यासिद्धपदेनअसूत्रमुमिसादिनस्येपेदितिभा
वः यथाचैतन्नसिध्यतितथाउदः स्थास्तंभ्वोरावसरेस्याभिरूपयादेषिष्यते एकादशायेति यद्यपिभाष्ये
ष्टाष्टकाउदात्ताद्यस्तनोक्तास्तथापिकैयटोक्तिसनुस्त्यपकारश्चोक्ताइतिबोध्यम् लवयोश्वमाइति वाल
वोयत्नायवाह्यप्रयत्नाः केचित्स्नुअभोगाघायेनोपनिवद्धाः नयथा खरोविवाराश्वासाअघोषास्य हशः
संवारानादाघोषाश्च वर्गाणांप्रथमतृतीयपंचमायणश्चाल्पप्राणाः वर्गाणांद्वितीयचतुर्थौशलश्च
महाप्राणाइति श्वासानुप्रदानाइति श्वासप्रयत्नकाइत्यर्थः विवृणापतेकंठमिति विवारएवप्रयत्न
मितिभावः अभेति तिहश्चोहश्चायमाश्चनसास्यनादेतिनादभागिनोनादप्रयत्नवतः अघुगमा
इति प्रथमतृतीयपंचमावर्गेष्वयुग्माः वर्गीयमणाइति वर्गीयमणाश्चेत्यर्थः अल्पेति अल्पा
स्वेभ्यःप्राणाःपुंसिभूम्न्यसवःप्राणाइत्यमरः शानुपयुक्ताइति अन्यथाकखगघादीनांपरस्पर
सावर्ण्येनस्यादितिभावः आन्तरतम्यपरीक्षायामिति परीक्षावाह्यायोषस्यमहाप्राणस्यसस्यताह ८

णापवर्ग्यकारः घोषवतो नादवतो महाप्राणस्य हस्तनाद्दूष्मोवर्गीचनर्थ्यंठ्मादिस्वटीभविष्यति कादयइति लो
कप्रसिद्धपाठापेक्षमिदम् चतुर्दशास्वप्यामावसानत्वयोगात् कपाभ्यांप्रागिति पनत्र्योपलक्षणम् खफा
भ्यांप्रागित्यपिवोध्यम् अर्द्धविसर्गेति साहृश्यमुच्चारणेलेखनेवोचवोध्यम् ऋऌवर्णयोरिति ऋस्यक
इतिप्रकृतिभावः विग्रहस्त्वञ्चाचलृवर्णश्च ऋऌवर्णौतयोरित्येके मनोरमायांतुऋचऌचऋचऌतौतौच
तौवर्णौचेत्यादिस्थितम् नाज्झलौ आकारसहितइति कालसमयवेलासित्यादिनिर्देशादाकारप्रश्ले
षलिंगम् यथासंख्यमिति शीतलशब्देनसवर्णदीर्घैश्चादिश्चावर्थः इहअसेपक्षित्यादौहोठइतिठत्वेन
हस्वचम् इणइतिसस्यषत्वमपिनेतितत्त्वनहस्वचंटत्वेप्रतिनस्यासिद्धत्वादितिदिक् अन्यथेति ना
ज्झलावितस्यानांभे ग्रहणकशास्त्रवलादिति अयंभावः ग्रहणकशास्त्रवलाद्दीर्घादीनामिवहका
रादीनामपकारवाच्यत्वमुपगतेश्रचस्यात् प्रत्याहारग्रहणेतद्वाच्यवाच्येनिहृदलदणाभ्युपगमादि
ति अविधीयमानोऽणिति तेनइदमइप्राउत्यत्रत्रिमात्रइकारोनभवति उदित्त्वेति इहाविधीयमानइ

त॰ त्व॰
बो॰ थि॰
९

तिनसंबध्यते उदित्करणसामर्थ्यात्तेनविधीयमानोप्युदित्सवर्णान् ग्राह्यत्येव कुहोश्चुः जगाद जघटे परेणण
कारेणेति व्याख्यानतो विशेषप्रतिपत्तेः उपसंगृह्णतीत्यत्र उदित्यादौ तपकरणलिंगाच्च यदिपूर्वेणास्या
व् तर्हि तपरत्वमिहानर्थकं स्यात् अकारस्यानणत्वेन सवर्णाग्राहकत्वात् एवं च तपरत्वादीर्घेण
उपकरकार्भीयतीत्यादि वक्ष्यमाणग्रंथः संगच्छते एवं च ऌकारोपीतित्रिप्रातः संज्ञोत्पन्नपक्षोपतेपतश्चन्या
यसामर्थ्यादुक्तम् वक्तुं ऌकारस्य अकारग्राहकत्वेन क्वाप्युपलभ्यते सूत्रारंभसामर्थ्यादिति सतिवसाव
ऐपंप्रकारेण ऐकारग्रहणादौकारेण चौकारग्रहणादेश्चोञिनिसूत्रारंभो वृथास्यादितिभावः नापादनी
यमिति तेनग्लावंग्लावइत्यत्रऔतोम् शासोरितिनप्रवर्त्ततइतिमूलेएवस्फुटीभविष्यति ययतीति य
हणाकरणास्त्रस्याद्याष्यतिष्यष्यात्तेः एतच्चाकः सवर्णेदीर्घइत्यत्रस्फुटाकरिष्यामः आद्यंतेरेति ग्रह
णांसमाम्नायउपदेशस्तत्रभवाः आंतरसमाम्नायिकाः वर्णव्यक्तयोंतारादान्नाइतिठञ् हाटइति
नभवति यद्यप्याकारप्रश्लेषाभावेसंयोगान्तलोपप्राप्नोतिनत्वढत्वेनस्यासिद्धत्वादतोत्रसंयोगान्तलो ९

येन भवतीति वक्तुमुचितम् तथापि कार्यकालसंज्ञापरिभाषमिति पक्षे त्रैपादिकेऽन्तरंगे बहिरंगपरि
भाषाया अप्रवृत्तेरन्तरंगे ठल्लोके कर्तव्ये बहिरंगः संयोगान्तलोपोऽसिद्ध इति मत्वेदमुक्तमित्येके अन्ये तु संज्ञा
पूर्वको विधिरनित्य इति लोपस्य वारणे कथंचित्कर्तव्ये शाक्यमित्याशयेन ठत्वे नेत्युक्तमित्याहुः विश्वपाभि
रित्यत्रेत्युपलक्षणं विश्वपाः विश्वपाभ्यामित्यादावपि न भवति हो ढ इत्युपलक्षणम् एवं गापुमित्याः
दे कयोः ह इत्याकारस्य यकारो नेति दिक् पुदित्विहितमुच्चारणमित्यत्र ईषत्स्पृष्टमित्यत्र ईषदिति अन्तेव
संस्वराणां चेत्यत्र निर्दिष्टत्वाई षद्विष्टमन्वष्ठाणां विहितेस्वराणामिति प्रयत्नभेदो व्याख्यायते न तदा नाज्झला
विति सूत्रेऽनक्षरशाक्यमित्याकरे स्थितम् अन्तनासिकात्व इति येन्वाक्षरसमाम्नायिकानामणामेव
सवर्णसंज्ञा भवन्तीति भावः एवं च रेफोष्मकारस्य अण्प्रत्याहारान्तर्गतोऽपि न कस्यचित्सजातीयस्सवर्णो
ऽस्त्यन्यस्याभावादित्यवगन्तव्यम् सचनान्यरश्चेति नेत्रादिना उभयं विवक्षितमिति भावः वृद्धिरादैच्
आच्च ऐच्चेति इतरेतरयोगद्वन्द्वः सर्पांहल्लुगिति ओऽड्हल्लुग्वा यद्वा समाहारद्वन्द्वः नचैवन्द्वन्द्वा

ने·त·
वो·धि·
१

स्तुदघहांतात्समाहारउनिरच्स्यादितिवाच्यम् समासांतविधेरनित्यत्वात् तत्रचप्रमाणंसमासेषुवक्ष्यामः
अथवाआदित्यसमत्वमेवास्तुवृद्धिशब्देसतेत्रेणाकृत्यावयोजनीयः अयस्मयादित्वेनभत्वाद्बोकुरितिकु
त्वेन येजिह्वद्विमात्रपवतात्परत्वात् तेनकुम्मेकत्वमित्यत्रत्रिमात्रोनवृद्धिरेचोत्यादयः अदेङ्गुणः तप
रकरणमिहसर्वार्थंतेनगंगोदकमित्यत्रत्रिमात्रोनतत्रतीत्यत्रत्वकारएवनत्वकदाचिदाकारः नचप्रमाण
नत्वान्तर्येणनियमसिद्धिः रपरत्वेकृतेराकस्याप्यर्द्धमात्रत्वात् अपरस्यार्द्धतृतीयमात्रत्वात्मत्रणप्रदेशास्तु
कृणञ्चतेगुणाउत्पादयः भवादयो भवास्यो भूश्चवाश्चभवाविति द्वंद्वः आदिशब्दयोर्व्यवस्थाप्रकारवा
चिनोरेकशेषः आदिश्चआदिश्चआदीभूवेदैआदीयेषामितिविग्रहः भूप्रभृतयोवासादृश्यंचक्रियावा
चकत्वेनेत्यभिप्रेत्याह क्रियावाचिनइतिकिम् याःपश्यसीत्यादौयातेर्मामभूत् सतिहितस्मिन्यातेनाथा
तोरित्यालोपःस्यात् इतिस्थितेमनोरमायाम् भ्वाद्यः किम् हिरुक् पृथक् स्यंभादीनांमाभूदिकरणेनसो
त्राणांयाविवक्षाप्यते चुलुंपादीनांतवद्रुत्वमेतन्निरदर्शनमितिगणसूत्रेणसंग्रहः प्राग्रीश्वरान् रेफविशि १

ग्रहणं किम् ईश्वरेतोसुन्कसुनावितिप्रस्य व्याप्तिन्यायेन वाधितत्वं माभूत् यद्यपि तु प्रमासन्नेवाधिरीश्वरइ
त्यस्यावधित्वमिति हि विरुद्धेन तर्हि स्पष्टप्रतिपत्त्यर्थमेवास्तु चादयः अद्रव्यार्थाः किम् पशुः लिंगसंख्या
नितंत्रसम इहतस्यादेवलोयंनयतीति पशुमन्यमानाः पशु इति समग्रार्थे व्ययम् गतिश्च उपसर्गसंज्ञा
यासमावेशार्थश्चकारः अन्यथा आकडारादेकासंज्ञेति पर्यायः स्यात् तत्फलं तु प्रणेयमित्यादावुपसर्गा
दिसमासस्तु निणत्वस्य गतिकारकेतिकृदुत्तरपदप्रकृतिस्वरसिद्धिश्चेति दिक् निसनिरदसदुदुरिति उपसर्गस्या
पत्तावितिनिरूढः रोलंत्वम् निसघनेदलयते निसाद्दुसः श्चरुत्वस्यासिद्धत्वाज्झलाभावः निरपत्ते दुरयते नवे
तिविभाषा नेतिनिषेधो वेतिविकल्पस्तदाह निषेधविकल्पयोरिति विभाषाश्वेरित्यादौ निषेधविकल्पा
वुपतिष्ठेते तत्र निषेधेन समीकृते विषये पश्चाद्विकल्पः प्रवर्तेते शुशाव शिश्वायेत्यादावप्राप्ते विकल्पः
शुशुवतुः शिश्वियतुरित्यादौ च विप्रस्वपीतिनित्यप्राप्ताविति विवेकः अत्रेदं वोध्यम् इतिशब्दः काकाक्षिगो
लकन्यायेनोभाभ्यां संबध्यते स च पदार्थविपर्यासकृत् तेन निषेधो विकल्पश्च न त्वाशब्दार्थः संज्ञी विभाषा

त॰ त्व॰
बोधि॰
११

शब्दार्थयोर्विकल्पः संज्ञा उभयत्रविभाषार्थं चेदं सूत्रम् प्राप्तविभाषायामप्राप्तविभाषायां च नास्योपयो
गः प्राप्तविभाषायां ह्यभावांशस्य सिद्धत्वेन विभाषाश्रुत्या पक्षे न भवतीति भावांशमनूद्य पक्षेऽभा
वविधानमात्रकरणात् अप्राप्तविभाषायां त्वभावांशस्य सिद्धत्वेन पक्षे न भवतीत्यभावांशम
नूद्य पक्षे भावांशमनूद्य पक्षे भावांशमात्रकरणात् विभाषाश्वेरित्युभयत्रविभाषायां तु यदि विधि
मुखेन प्रवृत्तिस्तर्हि पित्त्वे वसंप्रसारणविकल्पः स्यात् किन्त्वेतु नयजादित्वाद विस्वपीति नित्यमेव स्या
त् अथ प्रतिषेधमुखे प्रवृत्तिस्तर्हि कित्त्वे व प्रवृत्तिः स्यान्न तु पित्त्वे न च पित्त्वविधिमुखेन कित्त्वनि
षेधमुखेन तूभयत्रापि षेधमुखे प्रवृत्तिस्तर्हि कित्त्वेष प्रवृत्तिः स्यान्न तु पित्त्वे. न च पित्त्वविधि
मुखेन कित्त्वनिषेधमुखेन तूभयत्रापि प्रवृत्तिरस्त्विति वाच्यम् वैरूप्यलक्षणवाक्यभेदप्रसंगात्
संज्ञाकरणे तु श्रुतक्रमानुरोधेन नवेति प्रतिषेधः प्रथमं कित्त्वप्रवृत्तेते ततः किदकिद्रूपे सर्वस्मिन्
लिटि एकरूपप्रापिते सति पक्षे भवतीत्येकरूपेण विधिमुखेनैव प्रवर्त्तते इति ॥ इक्किम् संज्ञावत्त्वेरू ॥

पमितिवचनाच्छब्दस्यसंज्ञामाभूत् तथाहिसतिविभाषाश्वेरित्यस्यानशब्दःश्वयतेरादेशःस्यात् इति
शब्देनसतिअर्थः संज्ञीतिलभ्यते तथाहिलोकेह्यर्थप्रधानशब्दः गौरित्ययमाहेत्यादौनशब्दस्व
रूपपरः संपद्यते व्याकरणेतुस्वंरूपमितिपरिभाषयास्वंरूपमितिपरिभाषयास्वंरूपपरत्वमौत्स
र्गिकम् इतिशब्दसमभिव्याहारेत्वर्थपरत्वमितिविशेषः इदमेवेतिशब्दस्यपदार्थविपर्यासकत्वन्ना
म संज्ञात्वमर्थस्यैव ननुविभाषाशब्दस्येतिव्याख्यानस्यादेकोरन्यतरस्यामित्यादौद्वारषल
म उभयत्रविभाषाहितन्तूत्रम् अभ्यवपूर्वस्यहरतेर्भक्षणार्थत्वाद्विकारार्थस्यकरोतेरकर्मकत्वाच्चग
तिबुद्धीत्यादिना अत्राकर्मकाणांकर्मत्वेप्राप्ते अर्थान्तरेचाप्राप्तेतदारम्भात् उदाहृतंचभाष्ये प्राप्ते
तवत् अभ्यवहारयतिसैन्धवान् अभ्यवहारयतिसैन्धवैः विकारयतिसैन्धवान् विकारयतिसैन्ध
वैः अप्राप्तेतुकटंदेवदत्तेनेतिदिक् स्वरूपशब्दस्य अग्नेर्ढक् अग्नेयम् आङ्गेयमदनः आय
च्छेते आहृते इहाग्निस्वरूपम् स्वपनपदसंज्ञितः मन्त्राग्न्यादिवाच्यादेशगरादेष्ठगादिप्रत्य

त॰त्व॰
बो॰धि॰
१२

योन संभवतीति स्वरूपादेव स्यात् प्रातिपदिकादित्यधिकाराच्चेति किमनेन सूत्रेणेति चेत्सत्यम्. अ
ग्न्यादिशब्दपर्यायेभ्यो मा भूदिति सूत्रस्यारंभः ननु स्वरूपग्रहणं विनापि स्वशब्देन रूपमेव ग्रहीष
ष्यते प्रतीतावुपदेशानपेक्षत्वादसाधारणत्वादंतरंगत्वान्नियतोपस्थितिकत्वाच्च अर्थो हि प्र
तीतौ संबंधग्रहणमपेक्षते पर्यायैरपि प्रत्यायनात्साधारणः पदज्ञानजन्यबोधविषयत्वाद्बहि
रंगः अनुकरणादशायामप्रतीतेरनियतोपस्थितिकश्चेति किमनेन स्वरूपग्रहणेन उच्यते स्वग्रहणा
त्स्वेःयोपि विवक्षितो रूपवदिति ज्ञापनार्थं स्वरूपग्रहणम् तेन अर्थवद्ग्रहणे नानर्थकस्येत्यु
पपन्नं भवति तत्रोक्तज्ञापकादर्थोऽग्राह्यः स्वमिति वचनात्स्वरूपं चेति सामर्थ्यादर्थवतो रूपस्य
ग्रहणम् तेन काकोऽकृशोऽत्र त्रपोऽत्र न त्रप्रोऽत्र यप्रगृह्यसंज्ञा न भवति प्राहूहोढ ऊत्यत्र ऊढ
ग्रहणेन क्तांतमेव गृह्यते न तु क्तवत्वन्तस्यैकदेश इति अन्यत्र विस्तरः अशब्दसंज्ञेति किम् उप
सर्गयोः किं दाधाभ्यो घ्वास्यात् तु धातोः शब्दार्थकान्मा भूत् न च दाधाविति सुसंज्ञाकरण १२

समासामर्थ्यादेवराथाभ्यः किंस्यादितिवाच्यम् घुमास्थेत्यादिनाआतईत्वादिविधौसंज्ञाकरणस्यावश्यकतया
सामर्थ्योपहत्याव् इहशब्दस्यसंज्ञेतिनषष्ठीसमासःकर्मकरणमित्यादिसूर्थसंज्ञासुस्वरूपग्रहणापत्तेः स्व
शब्दःशब्दशास्त्रेतत्रसंज्ञाशब्दसंज्ञेतिसमासस्तदाह शब्दशास्त्रेयासंज्ञेति येनेतिकरणेल्युडनीयानटकर्त्र
रितस्याःकृद्योगषष्ठ्यावाषष्ठ्यावाधात् नचउभयप्राप्तौ कर्मणीतिनियमेननिर्वाहः कर्मणउक्तत्वेनोभय
प्राप्त्यभावात् यथाचात्रकरणेल्युडनीयेव करणंचपरंतत्रेकर्त्रेयिष्ठितंस्येवकरः एवंचेहल्युडनीयपापरंते
येलुट्पते नचपरजिम्पदाविकारादीनांपरंतत्रेधात्वादीनांचस्वातंत्र्यंवास्यादीनामिवतद्वादीनामिवसं
भवति किन्तुवैवदिकः तेनविशेषणमप्रधानंतत्त्वान्मांतस्यसंज्ञेतिफलितंतदेतदाह विशेषणंतदंत
स्येति स्वस्येति संरूपमित्यनुवृत्तेरेवतल्लभ्यते परत्र इकारांतादिकाररूपात्रयाणोरत्र जयः अयः
समासप्रत्ययविधौप्रतिषेधइति कष्टंश्रितः कष्टश्रितः नेहकष्टंपरमश्रितः नडादिभ्यःफक् न
डस्यगोत्रापत्यंनाडायनः नेहसूत्रनाडिः अनुशातिकादित्वादुभयपदवृद्धिः अग्निहर्णेति अग्निहर्णी

न॰ त॰
बो॰ पि॰
१३

ग्रहणं वर्जयित्वा उभिद्ग्रहणं ग्रहणवर्जं द्वितीयायां चेति खल् महान्तमतिक्रान्ता अतिमहती महच्छब्दस्य
गौरादित्वेऽप्युपसर्जनेषिद्गौरेति ङीषोऽप्रवृत्तेः हगितम्श्च सुगिदंतान्ङीप् अतइञ् दादिः नचेदसामर्थ्या
त्तदन्तविधिः अस्यापत्यम् इः कामः इत्यत्र चरितार्थत्वात् नचैवमिञोऽनित्यत्वमर्थमितिवाच्यम् वाह्वा
दिभ्यश्चेत्यत्र यथायथं चेद्याद्युताभ्यां चरितार्थत्वात् नन्वेवमपि ओपगविरित्यादावेव अनर्थकत्वमस्यात् न
नदादिनित्यादौ आकारस्येहानर्थकत्वादितिचेन्न वर्णग्रहणे अर्थवत्परिभाषाया अप्रवृत्तेः विरामोवसा
नम् विरमणं विरामः भावेघञ् पाद्वादनुशासनप्रस्तावादाह वर्णानामिति संज्ञाप्रदेशास्त्ववसानइत्या
दयः अवावस्यापिव्रह्मिष्ठतेपौर्वापर्यमस्त्येव यथोच्चरितप्रध्वंसिनोनित्यविभ्रंनावावर्णानाम् यद्वा
विरमातेऽनेनविरामः वाङ्कालकान्तरणेघञ् वहूच्चारणान्तरेनोच्चनेऽणोन्त्यवर्णोऽवसानसंज्ञस्यादि
त्यर्थः अस्मिंस्तुपक्षेवरवसानयोरित्येकोपिसप्तमीविषयभेदाद्भिद्यते खरिपरेरेफस्यविसर्गः अवसा
नेरेफस्यानिनीति सुसिद्धं न्तपदम् अत्रान्तरग्रहणम् यत्रसंज्ञाविधौप्रत्ययग्रहणेतदंतग्रहणं नास्ती १३

विज्ञापनार्थम् तेनेईदूदेद्द्विवचनं प्रगृह्यमिति नद्विवचनान्तप्रगृह्यत्वम् अन्यथाकुमार्योरगारे कुमार्यगारमित्य
त्रप्रकृतिभावः स्यात् कथं न हि प्रातिपदिकसंज्ञायां कृत्तद्धिताभ्यां तदन्तग्रहणमिति चेदत्राह कृत्तद्धितेतिसू
त्रेऽर्थवद्ग्रहणमनुवर्त्तते तत्सामर्थ्यात्तदन्तग्रहणमिति हलोनन्तराः संयोगः लघ्वक्षरार्थमेकाक्षरायाः संज्ञा
याः कर्त्तव्यायाः संयोग इति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं संयुज्यतेऽस्मिन्समुदाये वर्णा इति तेना
त्र समुदाये वाक्यपरिसमाप्तिर्नेत्यनेन गुणवृद्ध्यादिसंज्ञावत्प्रत्येकं किम् तथा हि सति दृषद्भिर्भिन्नैरित्यत्र व
कारसन्निधौ दकारस्य सन्निधौ दकारस्य संयोगत्वात्संयोगान्तलोपः स्यात् निर्यायादित्यत्र यकारः इति
वान्यस्य संयोगादेरित्येत्वं स्यात् सिद्धान्ते तु चोरहाभ्यामिति द्वित्वे सत्यपि नस्यासिद्धत्वादेत्वमात्रं न भवति
हल इति जातौ बहुवचनम् जात्याख्यायामेकस्मिन्निति वचनात् तेन द्वयोरपि संयोगसंज्ञा भवतीति
शिक्षेत्यादौ गश्शोस्तु हलइत्यच प्रत्ययः सिध्यति यत्र बहवो हलः सन्निकृष्टास्तत्र द्वयोर्बहूनां चाविशेषेण
संज्ञेति स्थितमाकरे यदि तु बहूनामेव स्यात्तर्हि गोमान्करोमान्करोतीत्यत्र मतुपस्तकारस्य संयोगान्त

त॰ बे॰
बो॰ पि॰
१४

लोपो न स्यादित्यादिक्। हलः किम् तितउभ्याम् अत्र तनोतेर्ईउ सनवच्चेति डुप्रत्ययः सन्वद्भावात् द्वित्वम् सन्य
तउ तितउत्वंच अस्योच्चारणसामर्थ्याद्गुणाभावः यद्यप्यचोरप्यनन्तरयोः संयोगसंज्ञा स्यात् तर्हि संयोगान्तस्ये
त्युकारलोपः स्यात् अनन्तरा इति किम् पनसं पदीदम् अकारयोः संयोगसंज्ञा स्यात्तर्हि स्कोरिति लोपः ॥
इति संज्ञाप्रकरणम् ॥ इको गुणवृद्धी यत्र सा ज्ञा स्यात्तीन निर्दिष्टः सार्वधातुकार्धधातुकयोरिति विहिते
त्यादौ तत्रैवेयं परिभाषा प्रवर्त्तते नाचो ञ्णितीत्यादौ स्थानिनिर्देशात् गुणवृद्धिशब्दाभ्यामिति एतच्च पूर्वसू
त्राभ्यां गुणवृद्धिपदे अनुवर्त्त्य गुणो वृद्धिरिति योगेन – द्वीइतियोजनया लभ्यते तेनेह न त्यदादीनामः इमम्
द्विनन्दौ ल्वोः विधीयेते इति यत्र त्वनुवादो वृद्धिर्यस्याचामादिरित्यादौ तत्रेक इति नोपतिष्ठते अनुवादे परिभा
षाणामनुपस्थितेरिति भावः अनुवादे परिभाषाणामित्यस्यानुद्यमानविशेषणे चेत्यर्थः अनुपस्थितौ लिंगं चो
दीचां मातः स्थाने इत्यत्र स्फुटीकरिष्यते षष्ठ्यन्तमिति सूत्रे षष्ठ्यन्तस्यानुकरणात् षाष्ठस्वरूपफलकत्वयानवु
सकत्वात्सौत्रे लिंगव्यत्ययेन संतस्येति दीर्घेणैवभावः पदमिति नच संभवति सामानाधिकरण्ये इगन्तस्याङ्गस्येत्यादिक १४

मेणासंवक्ष्यते सिद्धेर्गुणः स्फुजेर्हद्विरित्यादौ न सामानाधिकरण्यासंभवान्निर्दिष्टज्ञोरवयवस्यैक इति संवक्ष्यते
अचश्च ह्रस्वदीर्घेत्यादि एतच्च कालोऽजिति सूत्रादज्कस्य दीर्घे प्लुत इत्यनुवर्त्य ह्रस्वो दीर्घः प्लुत इति योऽजिति
तियोजनया लभ्यते ह्रस्वेत्यादिकिम् दिव उत् द्युभ्याम् अष्टन आ विभक्तौ अष्टौ अष्टाभ्यः औशित्यत्र कृता
त्वनिर्देशाज्ज्ञापकाज्जश्शसोर्विषये प्रवर्त्तमानस्याष्टन आत्वस्याचः स्थानिकत्वे सति नेनसिध्येदिति दिक्
षष्ठ्यंतपदमिति तच्च सति संभवे सामानाधिकरण्येन तेन ह्रस्वो नपुंसके इत्यजंतप्रातिपदिकस्य वह्रस्वः
श्रीपम् नेह ब्रवाग्ब्राह्मणकुलम् रामाद्वानां दीर्घ इत्यत्र न सामानाधिकरण्यासंभवात्कुमादीनामचसं
वक्ष्यते तेन ग्रामण्यनीत्यादि सिद्धम् वाक्यस्थेः प्लुत इत्यत्र सामानाधिकरण्यासंभवेऽपि टेयह्णसामर्थ्याट्टे
रवयवस्याचः प्लुत इति माऽभायते अन्यथालोऽन्त्यस्याचश्चेति परिभाषाभ्यामेव हि कृष्णेत्यादिवाक्यस्यान्त्य
स्याचः प्लुतसिद्धौ किमनेन टेर्ग्रहणेन तेनाऽग्निचित्यानेयीऽत्र वर्मा इत्यत्र इत्यादि सिद्धमितीति दिक् आद्यंतौ टकि
तौ भाविता आर्धधातुकस्येट पापपति मार्क्कासाङ्केत्यादिना युक् परस्तादपवादन्यायेन स्थानेयो

त॰ त॰ बो॰ धि॰ १५

गतस्यायमपवादः प्रत्ययः परस्मिन्नित्यनेन तु परत्वादयं वाध्यते येन चेत्यत्र तु गापोष्टक् इत्यादयः परापवादभवंति
मिदचोन्त्यात्परः स्थानेयोगत्वस्य परस्मिन्निति परत्वस्य वादः पञ्चाग्निवत्तानि नपुंसकस्य झलच इति नुम् हृणा
द्धि इत्यादिभ्यः श्नम् ननु पूर्वयोगावदपमपि पुरस्तादपवादन्यायेन स्थानेयोगत्वस्येति चेन्न वाध्यसामान्यचि
न्तायामभिन्नत्वस्य विषये प्राप्तं सर्वं वाध्यत इतीहाभ्युपगमात् अन्यथाऽमो मित्करणमानर्थक्यं स्यात् नचश्नश्न
णार्थं एवमकारः स्यादिति वाच्यम् तेणाहमिति निर्देशात् अचांमध्यइति सूत्रे जात्यभिप्रायेणाचइत्युक्त
वचनमितिभावः अचांमध्यइति किम् मुंचति लुंपति अंत्यादचः परो मित्स्यादिति प्राचां व्याख्या या
यां नैनसिद्ध्येत् पोमुचादीनामित्यत्रान्त्याचोसंभवेन परिभाषाया अनुपस्थितिप्रसंगात् अन्ये त्वचोन्त्या
त्परो मित्स्यादिति व्यत्यासेन योजयित्वा प्राचां व्याख्यामपि कथंचित्समर्थयंते पूर्वसूत्रादेतत्सूत्रेत्वनुवर्तते
एकदेशो स्वरितत्वप्रतिज्ञाबलात्ततोऽप्याचष्टे अत्रावयवइति तेन चारीणीत्यादावंगस्य नांतत्वेन दीर्घः
सिद्धः परादित्वे सतन सिद्ध्येत् अभक्तत्वे तु वहंलिट् इत्यत्र वहाभ्रेलिह इति खशि अरुर्द्विषदिति मुमि १५

मोनुस्वारोनस्यादपदांतत्वादितिभावः यत्तुकैश्चिदुक्तम् अभक्तत्वेवारीणांदीर्घोनस्यादितितत्तदा
दिग्रहणांस्यादि नुमर्थमित्यंगसंज्ञासूत्रस्यवार्तिकेनैवदूषितप्रायम् षष्ठीस्थानेयोगासूत्रस्थानेन
योगोस्यास्त्वितिविग्रहः निपातनादेत्वं षष्ठ्याःसंबंधमात्रवाचित्वेपीहपरिभाषयाषष्ठीसास्थानेयोगा
बोध्या किमविशेषेणेत्याह अनिर्धारितसंबंधविशेषेति अनिर्धारितेतिकिम् ऊदुपधायागोहः
ग्रामइदऊ हलोरित्यादावुपधासन्निधानेनावयवषष्ठीनिर्णीते गोहः प्राप्तइत्यादौमाभूत् सतिहि
नत्रापिस्थानेयोगत्वे गोहिप्राप्तिस्थानेधातुमात्रस्योपधायाश्चस्थाने ऊदितोस्यातामितिद्विक
स्थानेचप्रसंगाइति नचास्यप्रसंगार्थकत्वेविवक्षितम् दर्भाणांस्थानेशरैःप्रस्तरितमित्युक्तेद
र्भाणांप्रसंगाइतिप्रतीतेः एवंचइकोयणचीत्यादाविगुच्चारणप्रसंगेयणुच्चारणीयइत्याद्यर्थः
संपद्यते स्थाने सदृशतमइति अर्थात्प्रमाणतोमध्यएव अतएवगंगोदकमित्यत्रत्रिमात्र
ऊैकारोन इहस्थानेइत्यनुवर्तमानेपुनःस्थानग्रहणादन्योपिवाक्यार्थःसंपन्नःतास्यादिरूपे

ने॰ त॰
वो॰ चि॰
१८

स्याने यो ऽन्तरतमस्तत्प्रयुक्तान्तर्यवानिति यावत् सप्राप्यमाणानांमध्येस्यादिति तदेतदाह यत्रानेकविधमिति
स्यानार्थगुणप्रमाणतस्तत्र विधपित्यर्थः स्थानतो यथा दध्यत्र तालुस्थानस्येकारस्य तालुस्थानो यक
रः अर्थतो यथा वातण्डयुवतिः वतण्डस्यापत्यं स्त्री वातण्ड्यास्त्रेति गोत्रापत्ये यञ् तस्य लुक् स्त्रियामिति लुक् शार्ङ्ग
रवादित्वान्ङीचासौयुवतिश्चेति विग्रहे पोटायुवतीत्यादिना समासः पुंवत्कर्मधारयेत्यतिदिष्टपुमानः
पुंशब्दो वतण्डापत्यवाचिनो वतण्डीशब्दस्य तदपत्यवाचीवातण्डशब्दो भवति नतु वतण्डादिः गुणतो यथा
वाग्घरिः घोषवतो महाप्राणस्य नादहशप्रवघकारः प्रमाणतो यथा अमुं अमू अमून् अदसोसेर्दादुदोम
नेन ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घो ऽकारः तमपग्रहणं किं वाग्घरिरित्यत्र कयोर्हान्तस्य दस्यामिति पूर्वसवर्णो कि
यमाणो महाप्राणत्वसाम्येन द्वितीयो नादवत्वसाम्येन तृतीयश्च माभूत् किंतु नादवान्महाप्राणश्चतुर्थो घ
एव यथा स्यादिति वलीयऽइति तेन चेतान्तस्थानेतत्र प्रमाणतश्चान्तर्यो वानकारो नेतिभावः तस्मिन्निति स
प्तम्यन्तानुकरणमिदं निःशब्दो नैरन्तर्यपरः दिग्भिरुच्चारणक्रियः अविपरीणत्वकेचश्च व्यवहिते व्यव १८

दितेचसतिप्राप्ते अव्यवहितपवेति एवंसत्यपरस्यचप्रसङ्गः एवंसत्येवेतिचनियम्यते अव्यवहितेसतिऋकालि
तार्थंकथ्यते एवंसत्येवेतिकिम् दध्युदकारस्यमाभूत् अव्यवहितस्येतिकिम् अग्निचिदत्रसोमसुदत्र अ
वथानेचात्रवर्णेकृतमेवेतिषिध्यते नतुकालकृतेसंहिताधिकाराऽज्ञापकात् अन्यथानिर्दिष्टग्रह
णादेवासंहितायांग्रहणाद्यप्रसंगात् किंतेनसंहिताधिकारेणेतोमाचष्टवर्णान्तरेणेति एवंचसंहिता
धिकारवहिर्भूतविषयः कालव्यवायेपिभवतितेनाग्नाविस्नूइत्यादावव्यवहेऽप्यानङ् अतोदृष्टेदेवता
दृष्टेचइत्यादिना उत्तरपदेपरतोविहिताआनङादयोभवंतीतिदिक तस्मादितिपंचमीनिर्दिष्टग्रहणा
नुवृत्यालभ्यते तेनउत्तरस्यानन्तरंनभवमित्यादौ उदस्थेति एवंसवर्णानप्रवर्तते अलोन्त्यस्य
स्थानषष्ठीनिर्दिष्टस्ययदुच्यते सोन्त्यस्यहलः स्थानेस्यादित्यर्थः त्यदादीनामः यः सः स्थानषष्ठीति
किम् आर्धधातुकस्येड्वलादेरकारस्यपूर्वमाभूत् इदंचषष्ठीस्थानेइत्यनुवृत्यालभ्यते अलइतिकिं
पदस्येत्यधिकृत्यविधीयमानंवसुस्रंसुध्वंस्विति दत्वं परमानडुह्यामित्यादावंत्यादावंत्यस्यपदस्यमाभूत्

ते.त.
बो.धि.
१८

ङिच्चेत्ययमपीति अवङ्स्फोटायनस्य गवाग्रम् अनङ्सौसख्युः परस्य यदिति तस्मादित्युत्तरस्यादेरिति तु
नेत्युक्तिलस्य आदेरित्यंशस्य सर्वादेशबाधकत्वापत्तेः सिद्धान्ते तु परत्वात्सर्वादेशत्वं बाधकत्वमित्युप
दमेव वक्ष्यति आदेर्बोध्यमिति आदेरलो बोध्यमित्यर्थः अलइमनुवर्तते अनेकाल् अस्तेर्भूः वभूव न
न्वनिर्दिश्यमानस्यादेशा भवन्तीत्यनेकालादेशस्य सर्वादेशत्वं सिद्धमिति तत्किमनेकाल्ग्रहणेन नचा
लोंत्यस्येनेत्यस्य स्यादिति शंक्यं ङिच्चेत्यस्य नियमार्थत्वाभ्युपगमात् उक्ते अनेकाल्ग्रहणाभावे रामै
रित्यादावेसादेशः आदेः परस्येति भकारस्यैव स्यान्नेस्यान्त्यस्य सर्वस्यान इतिदिक् शितउदाहरणं इदम
इश्पाइतः इत्यादाविति आदेशांह्नेनातोभिसैसिमाक्षिप्यते परत्वादिति अत एवादेः परस्येतिसूत्र
कृत्किपत इत्युक्तम् नन्वनेकाल्शित्सर्वस्येत्यतः प्रागेव तस्मादित्युत्तरस्यादेरिति पठ्यतां किमनेन
पृथक्सूत्रकरणेन नचैवं न सिध्यति निर्दिश्यमानेति निर्दिष्टग्रहणं नात्रानुवर्ततेति वाच्यम् तस्या
पि सूत्रस्य प्राक्पठने बाधकाभावेन निर्दिष्टग्रहणानुवृत्तिसिद्धिः मैवं ब्राह्मणाश्चैदोइत्यत्राह्माभ्यः १८

पूर्वयोरपि जस्शसोरोशप्रसंगात् यथाश्रुतेन सूत्राभ्युपगमेन तरस्येतस्य शः प्रवर्तत एवेति नायं दोषः प्र
सज्यत इति अत्र केचिन्निष्कर्षमाहुः अनेकाल्शित्सूत्रात्प्रागेव वर्णितत्वाच्चाप तस्मादित्युत्तरस्यादे
रितिसूत्रे तेपरत्वात्सर्वादेशेनादेशेनादेरितिंशबाद विशेषादुत्तरस्येतस्य शस्यापि बाधितत्वाद्वाक्यसंस्का
रपदे त्वाक्षणाश्रसत्यष्टन असख्यनिस्थिते अष्टाभ्य इत्यस्य दिग्योग पंचमीत्वाद्व्याप्तिन्यायेन अष्ट
नौ गास्पूर्वयोरपि जस्शसोरौशस्यात् व्याप्तिन्यायफल मागीश्वरान्निपातनादिति पठितेपि प्रत्यासत्तिन्याये
नापि दीर्घस्य इति सूत्रावृत्तिकत्वसिद्धावीश्वरे तोसुन्निति सूत्रावधिकत्वनिराकरणायैरेक विशि
ष्टग्रहणं कुर्वता सूत्रकृतैव ज्ञापितः ततश्च सर्वादेशेनोत्तरस्येतस्य शस्यावाधनार्थं निर्दिष्टग्रहणान्तु
वृत्त्यर्थं चेत्तस्मिन्निति सूत्रात्परत्वकृतेनाद्यादेरित्यस्य सर्वादेशबाधकत्वं स्यात् तथा चातोभिस एस्मिस्याद्या
देशा आदेरेव स्यात् अनेकाल्शित्सूत्रासामर्थ्याभ्यरीत्या दोषचरितार्थत्वात् यथाश्रुतमेत्तरस्येतस्य शः
प्रवर्तते वैव व्याख्याभ्यः परयोरेव जस्शसोरौशस्यान्नतु पूर्वयोः तस्मादित्युत्तरस्यादेरिति सूत्रे तत्रोपि

त॰बो॰
बो॰धि॰
१८

यमनोरमायंथस्याप्ययमेवाशयइति अन्येतु यथाश्रुतसूत्रनिराकरणपरतयैवमनोरमायां योजय
ति तद्यथा नस्वृतमित्यस्य अनेनास्य अनेकाल्शित्सूत्रात्प्राक् नस्वृतमिति नार्थः आदेरित्यंशस्य
सर्वादेशबाधकत्वापत्तेरित्याद्यग्रिमग्रंथविरोधात् किंतु तद्ग्रंथानुकूल्याय स्वनूपमिति सूत्रात्प्रा
क् नस्वृतमित्यर्थोभ्युपेयः एवं चानेकाल्शित्सूत्रात्प्राक् नस्वृतेति तु नास्त्येव दोषइति मनोरमाग्रं
थाशयइति एवं स्थिते निर्दिष्टग्रहणानुवृत्तिलाभाय तस्मिन्निति निर्दिष्टइति सूत्रे तस्मादित्युत्तरस्यादेरित्य
स्मात्प्रागेव पठनीयं अष्टनोगास्त्रयोरप्यासांस्यादित्युक्तदोषस्तु इत्थं परिहरणीयः तस्मादित्युत्तरस्यादेरि
त्यत्रादेरिति पृथग्वाक्यमतेनात्तरसोत्रमनुवर्तते साच स्यानषष्ठीस्थानेइत्यस्य प्राप्तेः तत्र चायमर्थः पंच
मीनिर्देशेन यत्कार्यमुक्तं तत्सर्वं षिउतास्य स्थानेयद्विधीयते तदादेर्भवतीत्येकं वाक्यभेदमाश्रित्या
नाश्रयणादनंतरस्येत्यस्यापेनादेरित्यंशाप्येव सर्वादेशेन बाध्यते नच तत्रघ्नेनंशोपीतिनास्येव पू
र्वोक्तदोषः वाक्यभेदेन व्याख्यानंतु तरस्यादेरित्यसमस्तस्यासकरणेन ज्ञाप्यते अन्यथा उत्तरादेरिति १८

नस्यत्रितमित्येवंवदेव किंच अष्टाभ्यइत्यस्य दिग्योगपंचमीत्वेन एवं परसाधारणतया अष्टनोजस्शसो
रित्युक्तेप्यष्टनोगसंज्ञानिमित्तभूतौ योजस्शसौ तावेव शीभावापस्थितिकाविभक्तिश्छन्दसाद्धा इत्युत्तरयोरेव
औत्वस्यानन्तरपूर्वयोरिति दिक् स्वरितेनाधिकारः अत्रेत्थंभूतलक्षणेतृतीया अधिकारोविनियो
गः किंयद्दूरमधिकारइत्यत्र व्याख्यानमेवशरणं यथा आसप्तमाध्यायपरिसमाप्तेरंगाधिका
रः नतुप्रागभ्यासविकारेभ्यएवेत्यादि यद्वास्वरितत्वं यत्रतिसंप्रतितावरितेहष्टेऽधिकारोनिवर्तत
इत्यर्थः कः स्वरितोऽधिकारार्थकश्चेत्तन्निवृत्यर्थइत्यत्र व्याख्यानमेवशरणं नचैवं व्याख्यानादे
वानुवृत्त्यननुवृत्तीस्तः किमनेनसूत्रेणेति चेन्न अत्राहुः अर्थान्तरसंग्रहायेदंसूत्रंकृतं तथाहि
अधिकः कारोऽधिकारः अधिकं कार्यं गौणेपि शास्त्रप्रवृत्तिरित्यर्थः तथाच गौणमुख्यन्यायेय
त्रेनेष्यते अपादानाधिकरणादौ तत्र स्वरितः पाठः किंच अधिकः कारः कृतिर्विधेयं पूर्वं स
वेपरबाधनतयाचरत्न यत्तत्स्वाभाव्यान्नडित्यादिवदप्रमाणं पूर्वविप्रतिषेधाः सर्वसंग्रहीता

त॰ त्वं॰ बो॰ पि॰ १८ भवति तत्रतत्रस्वरितपाठेनैव गतार्थत्वादिति परिनिष्ठेति परानित्संयत्नऋदादिभ्यःष्ठाःहृद्दिति ऋत्यादि
भ्यःस्मन् ऋणाद्विपरमपिलचूपदगुणबाधित्वानित्यत्वात् प्राश्मौ यथापितबाबुधितबोन् परम
पिलोपश्चास्यान्तरस्मामित्युकारलोपंबाधित्वानित्यत्वदाउतमस्येत्याङुपदेतरंगयथा उभयेदेव
मनुष्याःइहप्रथमचरमेतिपरमविकल्पंबाधित्वासर्वादीनीतिसर्वनामसंज्ञाविभक्तिनिरपेक्षत्वे
नांतरंगत्वात् तथा स्रवतेर्णोऽश्रीतिचङिद्वित्वउपधाह्रस्वादंतरंगत्वाङ्वङ् अग्रुस्रवत्परादपवा
दोयथा परमप्यनेकालितिसर्वादेशंबाधित्वा ङिद्वेत्येतादेशाः इत्यादयो अस्थिदधीसङ् नति
त्यादंतरंगयथा ग्रामणीनीकुलेनित्यमपि इकोचितिनुमंबाधित्वा ह्रस्वोनपुंसकेतिह्रस्वः
कृतेतन्नुमि अनजंताङ्गस्येत्यस्यात् अंतरंगापवादोयथादैत्यारिःश्रीशः परमपिसवर्णदी
र्घंबाधित्वा अंतरंगत्वाद्गुणोपगणाचप्राप्ते अपवादत्वात्सवर्णदीर्घः तथाउस्रौस्रत्येउ
स्रः स्रुत्वास्रौस्रत्वउपत्रांतरंगत्वादिपङि उवङि चप्राप्ते अपवादत्वादरनेकाचइयोः स्रुधीतिच १८

पणा यद्यपवादोन्यत्रचरितार्थस्तर्हि परान्तरंगाभ्यां बाध्यत एव तथाहि डिद्वेनेनदन्तमार्थं इकारस्य क्तेऽष
न्तरादिषु चरितार्थत्वान्नातङ्गिन प्रवर्तते किंतु परेणानेकाल्शिदित्यनेनबाध्यते जीवनाद्भावान् अपनङ्
द्वन्द्वात्स्वरस्मृत्सर्वेद्यमिति स्थिते अन्तरंगेणाङ्गुणेन सवर्णदीर्घो वा बाध्यते तस्मस्मानान्यये देसावि: श्री
शाइत्यादेश्चरितार्थत्वात् असिद्धमिति तेनपवावेटमिसावौपतेपइत्यत्वं नक्रुअन्तर्गहाइति अकृतकार्या २७
इत्यर्थः एवं तर्हि सर्वस्य शास्त्रवैयर्थ्यं स्यादतस्त्राट निमित्तेविनाशोन्मुखेदृष्टेति लोकसिद्धार्थकथनमे
वत् यद्वा अन्तरार्थता प्येतत्कथने इष्यते वितर्कोनेइहत्कार्यं विशिष्टोयदुहो सदृशो विनाशोन्मुखे निमि
तके कार्यं अकृतोव्यूहोयेत्स्यकृतव्यूहाइति यद्यपि कृतम् पि शास्त्रं निवर्तते नीतिपरिभाषान्तरं एवा
ते फलं च तुल्यं तथापि कृतव्यूहाइत्येव लघुप्रत्वात् लनाथियंकस्य हराखा उभयं वरमिति स्यात् अदितिभावः
तक्रुर्वन्तीति यथा निषेदुषीमित्यादौ क्वसो रिदमन्तरंगत्वात्प्राप्तमपिभाविनासंप्रसारणेनबलादित्व
न्देन्तिनीत्यालोच्यनकुर्वन्तीत्यर्थः इतिपरिभाषाप्रकरणं इकोयणचि प्रत्याहारग्रहणेषु तन्त्राश्रयाचे

त· त·
बो· धि·
२

प्रसिद्धाल्लक्षणा सूत्रात्मौनात्त्वादिभ्य इति च निर्देशात् तेनइक्शब्देन षट्त्रिंशद्गृह्यंते यणशब्देन चत्वा
रः भाष्यमाणस्याणः सवर्णाग्राहकत्वात् एवं चेह यणि नद्वाच्यवाच्येलत्वणानंतरं कचेवृ भाष्यमाणस्या
णः स्ववर्णवाचकत्वाभावेन यणवाच्ययकारादिवाच्यानामभावात् अतो नास्ति यथास्मिन चलक्षा
र्थे वोयान्पूर्वभावशक्यो ऋकारानादाय यथासंख्यमस्त्विति वाच्यं एवमपि लक्ष्यीयचकर्थाभावं रः
कारल्कारयोः प्रत्येकं त्रिंशद्रूपत्वेनोऽस्वर्णानां रेफादेशस्य ऋवर्णानां लादेशस्य च प्रसंगात् तस्मादि
हस्यानेनतरसूत्रेणैवेष्टसिद्धिरितिमभिप्रेत्यानुपदं वक्ष्यति स्यानंतर्यान्तयोरिति अचीति कस्मादचि पर
इत्याकांक्षायामर्थादिक इति संबध्यते संहितायां विषय इति दध्यत्रेत्यादौ कार्यनिमित्तयोर्यदा अति
शयितसंनिधिर्विवक्ष्यते तदैव यणा भवतीति भावः अनचि च परो हि वेति यरोनुनासिक इति सूत्राद्वरो
वेति चानुवर्तते अचो रहाभ्यामिति सूत्राद चो हे चेति च तदाह अचः परस्येत्यादि एवं चान्तेवाग्रहणान्न
हैनेवेष्टसिद्धेस्त्रिप्रभृतिशाकटायनस्य सर्वत्र शाकल्यस्य दीर्घादाचार्याणामिति च सूत्रद्वयं नारंभणीयमिति २

भावः अवइतिकिं तादात्म्यमित्यादौ मस्यद्वित्वमाभूत् अनचीतियदिपर्युदासःस्यात्ततोनत्रिचयुक्तमनस्याह
रूप तथाह्यर्थंगतिरितिन्यायादचभिन्नेत्र सदृशेवर्णेहलीत्यर्थःस्यात् ततोलाद्यवाहलीत्येववदेत् तस्मात्प्र
सज्यप्रतिषेधइत्याह नत्वचीति एवंवावसानेपिद्वित्वंभवति वाक्‌वाच्क स्थानिवदादेशो आदेशोक्तेनस्वरू
पभेदात् स्थानिप्रयुक्तकार्याणामप्रवृत्तावतिदेशआरभ्यते अस्तेर्भूः आर्द्धधातुके विवक्षते तेधात्वादेशो
धातुवत् तेनाचोपदित्यादिधातुप्रत्ययःभव्यं बभूव किमर्थः अगादेशोगवान् तेनहुनादेशाद्धीर्वः सभावाः
केनकाभ्यांकेः आदेशग्रहणंकिमर्थं स्थानिवदित्येतावतैवसंबंधशब्दमहिम्नातल्लाभात् यथापितृवद
धीतइत्युक्तेपुत्रइतिगम्यते इतिचेत् अत्राह द्विविध आदेशः प्रत्यक्षआनुमानिकश्चेति अस्तेर्भूरित्या
दिःप्रत्यक्ष तेस्तुरित्यादिस्त्वानुमानिकः एकृश्यत्रहि रकारेणोकारोनःस्थानीअनुमीयते उक्तरेणचोः
कारांतआदेशः तथाचोत्स्तुरितिफलितोर्थस्तत्रास्मादेशग्रहणाप्रत्यक्षस्यैवग्रहणास्यान्त्वानुमानिकस्य
आदेशग्रहणसामर्थ्याल्लभपरिग्रहः तेनपचन्तिमादेस्थितेः नमानादसंज्ञासिद्धानीति मनेहरित्यादिष

ते. वे.
वी. पि.
२१

याकृतमेवास्तु एकदेशविकृतस्यानन्यत्वात्पदत्वं भविष्यतीति चेत् न अर्थवत्त्वमेव स्यान्पादेशाभावः विप्रग्रंतेर्वा
व्यवधानस्यैव प्रसक्तासंभवात् नवीहिप्रभृतीस्यानेयोगोऽस्तु कं स्यानेच प्रसंगात् सचार्थवत्तः अर्थप्रत्ययार्थशब्दप्र
योगात् यद्यपि तेःसिद्धादावसंभवतीदं तथापि सति संभवे अर्थप्रभृतकपव प्रसंगो ग्राह्य इत्यनेनैवादेशग्रहणे
नज्ञाप्यते अर्थवत्सर्वेसर्वेपदादेशादादीपत्रस्यथा णिनेः एकदेशविकारे हि नित्यत्वेनोपपद्यते इतिपदमि
हार्थवत् पद्यते तेनेति भुसतेः यद्यपि सर्वविकारेष्वतरो नित्यत्वानुपपत्तिस्तथापी हविकारएव नास्तीति
संधे एतत्सूत्राद्वकोल्लभेसृष्टे अनल्विधौ इति किं पश्चालाविधिः पश्चाल्लः परस्य विधिः पश्चालोविधिः पश्चा
लि विधिः लत्रमाभूत् तत्राल्विधौ यथा व्यूढोरस्केन अत्र सकारस्य स्थानिवत्त्वेन विसर्गवदष्ट्वमाश्रित्य
द्यवायद्वितिणत्वंप्राप्नं अलः परस्य यथा द्यौः पंथाः इहहल्ङ्यादिलोपोन अलोविधौ घ्यकामः लोपोऽश्री
वल्लीतिलोपोन न च उत्वविधिसामर्थ्यात् लोपोनभवेदिति शंक्यं घ्यपानमित्यादौ तस्य सावकाशत्वात् अ
अल्विधौ यतेः कः कट्ट्र इहहशि चेत्तुत्वेन नचेहस्यानिवद्भावेनजातेपृष्ठुतेग्राहुणेअवादेशश्चकृते हलि स २१

र्वेषामिति नित्यत्वेलोपेन कइष्टइति रूपं सिद्धमेवेति वाच्यं कापिष्टइति रूपांतरासिद्धिप्रसंगात् सिद्धांते तु काइष्टः क
पिष्टइति च रूपद्वयमभ्युपगम्यते अलचेह स्थान्यवयवपवर्गइत्युने तेनरामायेत्यादौ स्यपिचेति दीर्घोः सिद्ध्यति
तद्धितौ हियत्नादित्वमाश्रितं येनवोदशावयवो न तस्यान्यवयवः तथा अरुदितामित्यादौ रुथादिभ्य इति वला
दिलक्षण इट्‌च सिध्यति नटेनदाहन तस्यानलाश्रय इति आश्रयणं चेह यथाकथंचिन्न प्राधान्येनैवेत्या
ग्रहस्तेन प्रपंच्यस्तत्र वलालक्षण इडन अचः परस्मिन्पूर्वविधौ अचः किं आगत्य वाल्पपीत्यन्तनासिकालोपस्त
किं कृते अते स्थानिवत् परस्मिन् किं प्रादीध्येति नित्यत्वादिह्रस्वत्वं तच्चानुपरनिमित्ते तेन पीव्यर्णापारिति लोपे
कृते येतन्न स्थानिवत् पूर्वविधाविति किं नैयेयः निष्पर्वोद्धाम् उपसर्गयोः किं आपालोपः इचइतद्धकृत आ
कारस्य स्थानिवत्वेन तत्र चतत्वमपदेशेन ह्याच तं विरुद्धत्वाह्याध्येत नहि त्रिपुत्रो हि पुत्रव्यपदेशं लभते नन्व
वमपि विधिग्रहणमर्थं पूर्वस्येति षष्ठ्याकार्ये कृते मेइत्यर्थे स्यादेतत्प्रशाकत्वादिति चेत् न पूर्वस्यैवविधिः पू
र्वस्याहि विधिरिति समासद्वयलाभार्थं विधिग्रहणात् यद्यप्यत्र पत्रं पंचमीसमास पक्षे मलेनात लाघवं

त॰ त्व॰
बो॰ धि॰
२२

पूर्वं स्मादपि विधौ स्थानिवद्भावइति पक्षेतु अहावायइत्येवात्रणत्वमिति पदादिश्च चहके स्वीकृतपक्षः अल्लिथ
र्थमिति तेनच श्रूयेम इवस्य संप्रसारणेन उरदत्वस्य स्थानिवत्त्वेन संप्रसारणत्वपा तुसंप्रसारणइति षष्ठ्यात् नचो
दत्वस्य परनिमित्तेनेतिवाच्यं अंगाद्दिष्टेप्रत्ययेपरे तद्विधानात् एवंस्थाद्विधिः एवंविधिरिति पंचमीसमासप
क्षस्यन प्रयोजनं नन्वसि नन्वेते इदपणादेशस्य स्थानिवद्भावान्नेट् अत्रहितनिमित्तं नितिमिनत्वह स्थानि भ
माङ्काराम्पूर्वमितितन्निर्दंन प्रयोजनं वहिरंगस्ययणोसिद्धत्वादिडागमस्यात्राप्रसक्तेः नचनाजानंतर्यइति
निषेधः यत्रान्तरंगेवहिरंगेवाचोरानंतर्यमिति हरदत्तादिमतेनिषेधप्रवृत्तावपि उतरकार्येयत्राचप्रानंतर्यमा
श्रितेनतत्रवहिष्प्रल्लक्षणिनेतिकैयटमतेतदभावान्नचैवमपीपचन्निति णिजनेभवत्येव इहहि अंते रकारस्य च
श्रुतेर्यणइतिपरत्वेनस्य च परादिवद्भावात् कियहणेनग्रहणेसति सिजस्सत्तेतिज्ञसंप्राप्नोति णिलोपस्य
एकादेशस्यवास्थानिवद्भावान्नभवतीतिवाच्यं चेतर्हि लङ्वानन्तरोणिः संभवतीति तत्साहचर्याद्भ्यस्ताद
पिलङ् एवकेवलपक्षविधानात् नसिचासाहचर्याल्लुङ् एवग्रहणमस्त्विति चेत्काचविप्रतिषेधेपरमितिसाहच

यंस्थलीयत्वात् नचैवमप्यदस्मुत्वादित्यदादेशस्य निवारणाय पंचमीसमासपक्षत्वमावश्यकमिति वाच्यं वङ्का
रस्यश्रुतेरकारस्य चातो गुण इति पररूपे कृते कस्याभावाददादेशाप्रसक्तेः अत्र त्वेशस्य परादिवद्भावात् क
ग्रहणं न भवति अल्विधौ स्थानिवद्भावाप्रवृत्तेः अन्यथा अयजे इंद्रमित्यादौ सवर्णदीर्घो दुर्वार एव स्यात्
अस्तु वा परादिवद्भावस्तथापि ककारस्य अत्त्यादित्यदादेशे कर्तव्ये अनादेशेन स्थानिवद्भावे यत्वात् तस्मा
त्पंचमीसमासपक्षो निरर्थक एवेति चेत् अत्राहुः पंचमीसमासपक्षप्रयोजनं तयाप्यपीयचान्तमुदाहरंतो
भगवतस्तेनेहसाहचर्यं नियामकं तया सेमं ह्वित्रिश्च त्रगिति सूत्रे कृतोर्थग्रहणज्ञापकात्साहचर्येण सर्व
त्राऽश्रीयते एवं च भगस्तेषांदुलकि अभ्यस्तास्य यस्तजसः प्रवृत्ता अवोभवुरिति रूपं सिद्धमिति आत इति निय
मस्य सिचः परत्वमाश्रित्य योजुस्तस्माच्चल्लमात्रपरत्त्यामाथवार्हिभिर्व्याख्यातत्वात् अत एवाभ्यस्ताश्रयोज
स् नित्यत्वाद्गुक् अवोभवुरितिमल्ले यङ्लुगंते एवं नयाचापीयचन्तिमेतल्लिङ्ग्येपंचमीसमासपक्ष
मास्थपणीयमिति मन्येत्वाहुः पंचमीसमासपक्षप्रयोजनं तयाभाष्येवेभिर्दिनामाश्रित्यकइत्यस्याप्युदाहृ

तै·स्वे·
बो·प्रि·
२३

तत्वान्न तस्यैव यर्ष्यशंका कार्या यद्यपि यङोकारलोपस्य स्थानिवद्भावे विनापि पकारवदुपदेशेऽनुदात्तादित्व
त्रविहितविशेषणाश्रयणादेवङ्गानिषेधाप्रवृत्तौ भिंदेर्यङ्तात्क्विबेभिद्रितेतिरूपंसाध्यं तथापि मा
स्थितिकइत्येकतत्सिद्ध्यर्थंसपद्योभ्युपगंतव्यः नचमथ्यितेपएपमस्य माथ्यितिकइत्यत्रापितदस्यपए
स्मितिठक्यिकइकादादेशेचकृतेयस्येति चेस्यलोपादिहमन्त्कानादितिइकाः स्थानिप्रयुज्यमानो यः कादे
शः सोऽप्यल्लोपस्य स्थानिवद्भावेविनैवपरिहारः ठस्येकइत्यत्र स्थाने देशयोरकारइच्चारणार्थ इत्यभ्युपगमे
आस्थितेस्थानिवद्भावाप्रसक्तौ स्थानिकइकादेशाष्टो नभवतीतिकादेशप्रसक्तेर्माथ्यितिक इतिरूपसिद्धौ
किमनेन पंचमीसमासपक्षाश्रयणेनेतिवाच्यं मथ्यतेयते क्विपिटिलोपणौ लोपयोर्वेरपृक्तलोपेच मथ्यित
नेनचरतिमाथ्यितेनचरतिमाथ्यितिकइत्यत्र चरतीतिठकिनस्येकादेशासिद्धयेतस्यस्थानिवदपकत्वात् नह्य
त्रस्थानिवद्भावं विना इकादेशापवादः कादेशः सपरिहरः नाप्येतादृशकल्पनाया मानाभावः शंक्यो माथ्यि
तिकइति भाष्योदाहरणस्यैवमानत्वादिति स्यादेतत् पूर्वत्र समासवर्णपत्वेनसन्निहितस्यैवावर्णपत्वस्य चिन्त्य २

सन्निहितंचेहत्रयं स्थानी आदेशो निमित्तंतत्रातावत्स्थानीनावधिः तस्मादेशोनापहारात् नाप्यादेशनिमित्ते वैयाकरणा
इत्यत्र ऐकारस्यायादेशापत्तेरित्याशंक्याह अचः पूर्वत्वेनदृष्टस्येति पूर्वत्वमुपलक्षणं नतुविशेषणमितिभावः नपदा
न्तेद्वोतादीनाचरेनाम्नानौ ह्वह्वः ततोविधिशब्देनकर्मषष्ठ्यांतस्यसमासः विधिशब्दश्चभावसाधनोविधानंविधिस्तच
द्वेद्वोतिश्च यमाणत्वात्तस्यैकस्यैवयपते पदस्यचरमावयवद्वृतिवृत्तेवेनीतिद्वृदवीः वृद्धेवानीतिद्वृत्तवाः नमावष्टे वृ
त्तवर्याणि ततोविचवृद्दात् इहलोपोव्योरितिवलोपेन दिलोपस्यणिलोपस्यवास्थानिवत्वात् नचसद्भवतामि
नितिहृदकतादिमते अंतर्वर्तिसुपायेत्वान्नपदांतेतिनिषेधः शंक्यः विधेयस्यलोपस्यपदानवयवत्वात् पदांतस्यस्था
नेविधौनेतिव्याख्यानेतुनपदांतेस्थानिवत्वनिषेधाद्धलोपः स्यादेवेत्यादिमनोरमायांस्थितंद्विर्वचनादौचेतिय
लोपादयश्चादिशब्दार्थः वरेइतितुवरेवरयोजादेशः सस्थानिवदितिव्याख्येयं सहविवहाभावेपिनितनादेढः
सम्नमपल्लवकृच अघोदाहरणानिपदांते कानिसंतिःकोसः इहयणावादेशयोःकर्तव्योःअलोपोरलोपोनस्था
निवत् नचैकारौकारयोः स्थानिभूतादचः पूर्वत्वविरहादेवालोपोनस्थानिवदितिवाच्यं वाक्यादपोद्धृत्यपदा

निसंक्लिपंतइतिपदेस्यानिभूतादचः पूर्वत्वस्यसत्वात् यद्वागोचागोचेत्यादावोकारस्यावङि कर्तव्ये ऽग्रचइत्यल्लोपो
नस्थानिवदित्युदाहार्यं अत्र हिलोपस्यान्यकारोत्पूर्वत्वेन दृष्टत्वाद्दोकारस्य हिर्वचनेसुडुपास्यनाज्ञानंतर्यइति नि
षेधाद्बहिरंगपरिभाषात्रनप्रवर्तते स्थानिवद्भावनिषेधसामर्थ्याच्च एवं क्वचिदत्रापूर्वंयेचेरेयाद्यावरः
याभेयङ्.ताद्यश्वयङ् इतिचरच् अतोलोपस्य चआतोलोपइत्यचित्यालोपेकर्तव्येन स्थानिवत् यलोपेया
तिः यातेर्यङ्.तात् किंच अतोलोपः यलोपः लोपस्यस्थानिवत्वादातोलोपः पलोपः नचपुनरालोपः प्राक्तःवि
णोल्लुङ्.न्यायेनालोपस्यासिद्धत्वात् स्थानिवद्भावाच्च ननुपदिपलोपविधिंप्रतिस्थानिवन्निषेधप्रसत्तर्हिक
थंवाद्यौरिति उच्यते असिद्धंवहिरंगमितियणोऽसिद्धत्वान्नपलोपः नचनाज्ञानंतर्यइति निषेधः उत्तरकार्य
मचत्रानंतर्येयत्रतत्रैवतदाभ्युपगमात् किंचात्रस्वरदीर्घयलोपेषुलोपाजादेशएवनस्थानिवदितिवार्ति
मस्तितेनान्यःस्यावदेवभवतीतिनदोषः स्वरेचिकीर्षकःइकारस्यलितीत्युदात्तत्वेसनोऽतोलोपोनस्थानिव
त् नचलीतीत्याभसामर्थ्यकारकइत्यादौसावकाशत्वात् सवर्णान्तस्वारयोःशिशिरिष्वसेरलोपोनस्थानिवत्

यद्यप्यनुस्वारेण नष्टुत्वः वत्संगच्छताद्रूः ननु सवर्णग्रहणमात्रेण अनुस्वारोप्यादेशं शक्यत इति किमनेन ए
यगनुस्वारग्रहणेन सत्यं पृथग्ग्रहणाभावे यत्र परसवर्णस्तत्रैवेति संभाव्येत तथा च यत्र न परसवर्णप्रसंगः
शिषेतीत्यादौ तत्रस्थानिवद्भावेन निषेधं वरग्रहणात्पूर्वस्य लोपग्रहणं कृतमिति ज्ञेयं दीर्घप्रतिदीर्घः प्रतिदी
र्घो हलि चेति दीर्घं कर्तव्ये अल्लोपो न स्थानिवत् यणादेशस्य स्थानिवद्भावस्येव लोपाज्ञादेशपठनस्यापि स्थानिव
द्भावस्येव लोपाज्ञादेशपठनस्यानिवृत्तिस्वीकृतत्वात् तेन हलि च उपधायां चेति दीर्घो प्रवृत्त्या किर्योर्गिर्योः विय
तु रित्यादि सिद्धं जसि सन्धिस्वमेव अदनर्थिः अदेः क्तिनि वृद्धं लछेद सीतियस्त्वादेशाठ सिन सोढेली न पधालो
पः फलो फली तिसलोपः कृषस्तयोरिति षत्वे षस्य फलो जषि तिजस्य कर्तव्ये उपधा लोपो न स्थानिवत् समा
नस्य छेदसमन्दूर्पुप्रध्वस्तुदर्के क्षितिसः समानाधिः न चात्र सन्धिः न चात्र सलोपे यत्वे चकर्तव्ये पूर्वस्मादपीति
स्थानिवद्भावात् सन्धिरिति रूपं नस्यादिति वाच्यं पंचमीसमासपदस्य स्थानिवत्वात् न त्र निष्ठायां सेटीति लिंगात्
न त्र सेटीति पदं न तावदतिङ्व्यावृत्त्यर्थं णिजन्तान्तासंभवात् ननु संज्ञायितः पस्थुरित्यत्र यस्य विभाषेति द्रू ॥

त॰ त्व॰
बा॰ धि॰
२५

णिनिषेधे संभवत्येवानिष्टत्वे सन्नीवंतेतिविकल्पितेट्त्वादिति चेत् न यस्य विभाषेत्यत्रएकाचइत्यनुवर्तते अन्यथा द
धिद्विनइति इणस्यात् तत्रत नपनिदरिद्रातिभ्यइतिवार्तिके नसनोविकल्पितेड्त्वात् तस्मात्कालावधारणार्थं
लट्हस्मेइत्यादिकृते णिलोपो ननु ततः प्रागिति अन्यथाकारितमित्यादौ णिलोपकृते एकादेव उपदेशइतीणि
षेधः यदि तु एवं स्याद्विधेयो स्यानिवत्वे तर्हि णिचा व्यवधानान्निषेधप्राप्तिरेव नास्तीति सेटीत्यनर्थकं सतस्या
नित्यतो ज्ञापयतीति स्थितं ननु जपत्वविधौ यदि स्यानिवत्वनिषेधस्तर्हि पटपटीत्यत्रानवर्तिनी विभक्तिमा
श्रित्य यत्वाऽजत्वंस्यान्नैव इष्टवदिनतिदिष्टया भसंज्ञया पापटस्य यावाधाऽस्वाप्रवृत्तेः चरि जत्ताः जद्दुः चर्क्रि
रि अनल् उस्त च गमहनेत्युपधालोपः स्वरिचे जि च गरेत्वं प्रति न स्थानिवत् भाष्ये तु एवं त्रासिद्धेन स्थानिवदित्यबहु
भ्याद्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्यातः तद्दीसमस्तलोपे यत्वे च कर्त्तव्ये स्थानिवद्भावप्रसङ्ग एव नास्तीति
बोध्यं अदर्शनं लोपः अत्र इष्टविज्ञानं सामान्यवचनः दर्शनं ज्ञानं तदिह शब्दानुशासनप्रस्तावात् इह विषयकं
तदुच्चारणं संपद्यते तत्त्वश्रोत्रव्यापार एव तस्मिन्निषेधोऽश्रवणं नन्वेवं लोपोऽभावलीलान्वादौ वकारयकारौ नश्रो

तथाविति प्रोक्तस्यापारप्रवनिषेधेन प्रयोक्तृव्यापारउच्चारणमनिषिद्धंस्यात् प्रयोक्तृव्यापारउच्चारण
मनिषिद्धंस्यात् अत्राहुः अस्तिति चश्रवणोउच्चारणमनर्थकमेवेति समर्थ्याच्छ्रवणनिषेधेनतद्धेतुभूतमु
च्चारणमपिनिषिद्धंभवतीति प्रसक्तस्येति इहस्यानङ्सन्नवर्तनादेतल्लभ्यतेप्रसक्तस्येति किंदधिमधु
त्यादावागमोमाभूत् अस्तिहितत्रक्रियेयोर्दर्शनं तच्चलोपइतिप्रसक्तविशेषणाभावेप्रत्ययलक्ष
णेननुकस्यादेवेति दिक् संयोगांतस्यतदंतस्येति अलोंत्यपरिभाषयेतिभावः पञ्चपिविशेषणेनतदंत
विधिलाभात्संयोगस्यान्तेवसूत्रपितत्रचितम् तथापिप्रत्येकंसंयोगस्यान्तेवसूत्रपितत्रचितम् तथा
पिप्रत्येकंसंयोगसंज्ञेतियदेवृषत्करोतीत्यादौलोपवारपितसंयोगावैतोपस्येतिद्विवचनांतेनसमास
लाभार्थमंतग्रहणमितिमनोरमायांस्थितं यणःप्रतिषेधःइतिवाचनिकमिदं यद्वाचव्याख्यैपंव्या
ख्यात्वहेया कल्लोकलीत्येतोकलग्रहणमयत्कृष्यकलपवलोपोविधीयतइतिअन्तरंगेलोपिकर्तव्ये
वहिरंगस्ययणःसिद्धत्वमितिवा नचषष्ठीकपरिभाषैत्रैवपदिकमंतरंगंलोपेनपश्यतीतिवाच्यं

त॰त॰
वो॰वि॰
२८

कार्यकालपक्षाभ्युपगमात् न च नाजानंतर्यइति निषेधः उत्तरकालप्रवृत्ते लोपेऽजानंतर्याभावात् नद्धृत्कं
संयोगांतस्य लोपे यणः प्रतिषेधः न वाझलो लोपाद्ध्रि ह्रिंग लक्षणा द्वे चत्वारि रूपाणीति इह यकारस्य द्वि
द्वेन मध्ये चकृते एवं चात्रासिद्धीयमद्वित्वइति तस्यासिद्धत्वाभावेन लक्ष्यते दात्तु मद्ध्कारे द्वित्वप्रवृत्तौ रूपा
पिकमस्ति अत्र केचिदाहुः उकारात्परयरो द्वित्वकृते पुनरुकारात्परस्य यरो द्वित्वेन भवति निमित्त
भेदाभावादित्याशयेनेह मनुक्तिमिति तेषां तु नदादिगणे वक्ष्यमाणेत्यत्र उदरत्वस्याचः परस्मिन्निति स्थानि
वद्भावान्न संप्रसारणमितिवस्यात्वं नेति समाधानं ग्रंथोऽमलस्योविरुध्येत तन्निमित्तस्यालिटो भेदाभा
वादिति कू अन्येतु धकारस्य जश्त्वकृते एवं चात्राप्यसिद्धीयमद्वित्वेइति जश्त्वस्यासिद्धत्वाभावाद्दकारे पुन
र्द्वित्वं भवत्येव व्यक्तिभेदात् अतएव संयंतेऽत्यादौ परसवर्णो द्वित्वं माप्रकृते दा हृते वह्नस्तद्वत्यत्र दका
रद्वित्वसिद्धये एवं चात्रासिद्धीयमद्वित्व इति मनोरमायामप्युक्तं एवं यकारेऽपि द्वित्वस्य पुनः प्रवृत्तौ दन्त
भावः आष्टमिकद्विर्वचनस्थाने द्विर्वचनरूपत्वात्स्थान्यादेशाभ्यां शक्यमेदात् यत्तूक्तं मनोरमा

यांपकसंज्ञाबाधकत्वेकं लक्षणं सकृदेव प्रवर्तत इति पक्षः एवं पररूपेति सूत्रभाष्ये सिद्धान्तितत्वात्कथं
